दिनाङ्क:- 07.06.2024

प्रात:- 06:55

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचक: – सुरेशचन्द: शर्मा**

**अथवार्ता:**

**केन्द्रशासने नवशासनसंङ्घटनम्**

केन्द्रशासने नवशासनसंङ्घटनात् पूर्वं नवदेहल्यां वार्ताक्रमा: सततरूपेण प्रवर्तिता: सन्ति। राष्ट्रिय-जनतान्त्रिक युतिदलं नवशासनरचनाय सज्जापरं दरीदृश्यते। अद्य राष्ट्रिय- राजधान्यां राष्ट्रिय- जनतान्त्रिक-युतिदलस्य संसदीयदलस्य उपवेशनं भविता। उपवेशने एतस्मिन् भारतीय-जनता -पार्टी-दलं, तेलगु-देशम-पार्टी-दलं, जनता दलं, लोक-जनशक्ति- पार्टी-दलं, शिवसेना-शिंदेसमूहदलं, घटकदलानां नवनिर्वाचिता: सांसदा: सम्मिलिता: भविष्यन्ति। एतत्परं, भाजपादलं, जनतादलं, च गतदिने नवदेहल्यां पृथक्-2 उपवेशने रते दृष्टे। श्रीनड्डावर्यस्य आवासे भाजपादलस्य वरिष्ठनेतृणां, केन्द्रीयमन्त्रिणां च दीर्घोपवेशनं समायोजितम्। उपवेशने केन्द्रीय- मन्त्री अमितशाह:, राजनाथसिंह:, पीयूषगोयल:, प्रह्लाद: जोशी, मनसुख-मांडविया:, अश्विनी वैष्णव:, भाजपादलस्य राष्ट्रिय महासचिव:, तरूण चुघ:, विनोद: तावडे:, नैके वरिष्ठा: नेतारश्च सम्मितलिता:। जनतादलयूनाइटेड-इत्येतस्य दलस्य नैके नेतार: दलाध्यक्षेण बिहार प्रदेशस्य मुख्यमन्त्रिणा नीतीश कुमारेण सह नवदेहल्यां तदीयावासे मेलनं कृतवन्त:। जनतादल यूनाइटेड- इत्येतस्य दलस्य संसदीयदलोपवेशनमपि अद्य समयोजयिष्यते।

**नेपालस्य प्रधानमन्त्री**

नेपालस्य प्रधानमंत्री पुष्पकमल- दहल: 'प्रचण्ड:' प्रधानमन्त्रिण: नरेन्द्रमोदिन: शापथग्रहणसमारोहे सम्मिलितो भविष्यति। नेपाल- शासनास्य प्रवक्त्री रेखाशर्मा मन्त्रिपरिषदुपवेशनानन्तरं एतत्सम्बद्धां घोषाणां कृतवती। दरभाषवार्तामाध्यमेन प्रधानमन्त्रि दहल: लोकसभानिर्वाचने राष्ट्रिय- जनतान्त्रिक-युतिदलस्य विजयोपलक्ष्ये प्रधानमन्त्रिणे मोदिनं स्वीय- शुभाशंषां प्रकाशितवान्।

**आई.एन. डी-आई. ए**

'आई.एन.डी- आई. ए' इत्येतस्य महायुतिदलस्य नैकानि उपवेशानानि अपि लोकसभानिर्वाचन परिणामानन्तरं सततं समायोज्यमानानि सन्ति। एतत्क्रमे तृणमूल कांग्रेस दलस्य महासिचव: सांसदश्च अभिषेक: बनर्जी, दलनेता डेरेक ओ ब्रायन इत्यसौ च समाजवादी पार्टी- दलस्य प्रमुखेण अखिलेश-यादवेन सह तदीयावासे मेलनं कृतवन्तौ। अपरत्र आम आदमी-पार्टी -दलस्य राज्यसभा सांसद: राघव: चड्डा: शिवसेना- उद्धवसमूहस्य नेत्रा संजय-राउत-इत्येतेन सह मेलनं कृतवान्।

**केन्द्रीय- स्वास्थ्य-मंत्रालय:**

केन्द्रीय-स्वास्थ्य-मंत्रालयेन राज्येषु केन्द्र शसित प्रदेशेषु च भीषणोष्ण प्रकोपमालक्ष्य गतदिने समीक्षोपवेशनं समायोजितम्। उपवेशने एतस्मिन् स्वास्थ्य- महानिदेशक: डॉ अतुलगोयल: अखिलेपि देशे अग्निपराणां दुर्घटना-प्रकरणानां अपि समीक्षां कृतवान्। एतदुपवेशनम् आभासीय- माध्यमेन समायोजितमासीत्।

**इज्रैल्-हमास्**

गाजा-क्षेत्रे इज्रैल-कृतेषु विमान-आक्रमणेषु त्रिंशत् फिलिस्तीन-नागरिकाः मारिताः अनेके जनाः घातिताः च, येषु अधिकांशः बालकाः महिलाः च आसन् । मध्य-गाजा-पट्टिकायां विस्थापितानां नुसेराट्-शिबिरे एकं विद्यालयं लक्ष्यी-कृत्य विमानप्रहारः कृतः । इजरायलस्य युद्धक-विमानेन न्यूनातिन्यूनं तिसृषु कक्षासु बहुभिः क्षेपणास्त्रैः प्रहारः कृतः इति स्थानीयसूचनाभिः ज्ञातम् ।

**लक्ष्यभेदनस्पर्धा**

लक्ष्यभेदनस्पर्धायां सरबजोतसिंहेन पुरुषवर्गे दशमीटरपरिमितस्य लक्ष्यस्य भेदनं कृत्वा स्वर्णपदकं विजितम्।

**।। इति वार्ता:।।**